दिनाङ्क :- 18.09.2026

प्रातः - 06:55

## प्रधानमन्त्री - सेमिकॉन

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् भारतम् आपूर्तिशृङ्खलानां शस्त्रीकरणस्य मध्ये विश्वसनीयस्य अर्धचालक-विनिर्माणस्य वैश्विककेन्द्ररूपेण प्रतिष्ठापितम् अस्ति। असौ उक्तवान् यत् विश्वं नूतनानां विश्वसनीय-विनिर्माण-केन्द्राणाम् अन्वेषणं करोति तथा भारतम् एतस्याः आवश्यकतायाः पूर्तये निरन्तरं सज्जीकरोति। सः प्रतिपादितवान् यत् महत्त्वपूर्णेषु उद्योगेषु भारतस्य प्रगतिः वैश्विकाः आपूर्तिशृङ्खलाः सुदृढीकरिष्यति तथा विश्वे परिवर्तमानानाम् आपूर्तिशृङ्खलासम्बद्धानाम् आह्वानानां मध्ये नूतनावसराणां सृजनं करिष्यति। प्रधानमन्त्री ह्यः नवदिल्ल्यां यशोभूमौ सेमिकॉन-इण्डिया इत्येतस्य पञ्चम-संस्करणस्य उद्घाटनं कुर्वन् एतत् उक्तवान्।

ततः परं कार्यक्रमस्य अनन्तरं वार्ताहरान् सम्बोधयन् केन्द्रीयमन्त्री अश्विनीवैष्णवः उक्तवान् यत् सेमिकॉन् 2.0 इति पारिस्थितिकतन्त्रस्य अन्तर्गतम् अद्यावधि प्रायः एकलक्षकोटिरूप्यकाणां निवेशसम्बद्धाः प्रतिबद्धताः प्राप्ताः सन्ति।

## सेवा-सङ्कल्प-अभियानम्

भाजपेति दलेन प्रधानमन्त्रिणः नरेन्द्रमोदिनः षट्सप्ततितमस्य जन्मदिवसस्य उपलक्ष्ये ह्यः मासैकपर्यन्तं प्रवर्तमानस्य राष्ट्रव्यापिनः सेवा-सङ्कल्प-अभियानस्य शुभारम्भः कृतः। अस्य अभियानस्य मुख्योद्देश्यं जनसेवायां प्रधानमन्त्रिणः प्रतिबद्धतां प्रकाशयितुं तथा जनान्, विशेषतः युवकान्, सेवाकार्येषु प्रवर्तयितुम्

**प्रोत्साहितुं च अस्ति। अनेन अभियानेन गुजरातराज्यस्य मुख्यमन्त्रिरूपेण श्रीमोदिनः एकाधिक-द्विसहस्र-तमवर्षस्य अक्टूबर-मासस्य सप्तमे दिनाङ्के शपथग्रहणस्य पञ्चविंशतिवर्षपूर्तिरपि स्मर्यते। अभियानम् आगामिमासस्य सप्तदशदिनाङ्कपर्यन्तं प्रवर्तिष्यते।**

**<u>विदेशमन्त्रालयः - पारपत्रम्</u>**

**विदेशमन्त्रालयेन पारपत्र-संशोधन-नियमाः, विंशतिः षड्विंशतिः इति अधिसूचिताः, येन अशीत्यधिक-नवदशशत-तमवर्षस्य पारपत्र-नियमेषु संशोधनं कृतम् अस्ति। संशोधनानुसारं पञ्चदशवर्षात् न्यूनवयस्काय बालकाय प्रदत्तं षट्त्रिंशत्पृष्ठयुतं साधारणपारपत्रं पञ्चवर्षपर्यन्तं उत वा तस्य अष्टादशवर्षवयःप्राप्तिपर्यन्तम्, एतयोः यत् पूर्वं भवति तत्पर्यन्तं, वैधं भविष्यति।**

**<u>क्वात्रा - ऊर्जा</u>**

**अमेरिकादेशे भारतस्य राजदूतः विनयमोहनक्वात्रा उक्तवान् यत् भारतं विश्वस्य शीघ्रतमवर्धमानासु प्रमुखासु अर्थव्यवस्थासु अन्यतमं तथा ऊर्जसः तृतीयः बृहत्तमः उपभोक्ता अस्ति। अतः भारतस्य ऊर्जावश्यकता वर्धिष्यते, वर्धितव्या च। भारतस्य ऊर्जासम्बद्धावश्यकतायाः विषये सामाजिकसञ्चारपटले प्रकाशितेषु अनेकसन्देशेषु राजदूतः क्वात्रा प्रतिपादितवान् यत् भारतस्य जनानाम् ऊर्जासुरक्षा सर्वोच्चप्राथमिकता अस्ति। सः उक्तवान् यत् चतुर् दशांशोत्तर एकार्बुद-भारतीयानां कृते ऊर्जा महत्त्वपूर्णा सामरिकावश्यकता अथ राष्ट्रस्य विकासस्य च आधारः अस्ति। सः बलं दत्तवान् यत् भारतं मध्यपूर्व-अफ्रिका-लैटिन-अमेरिका-यूरेशिया-अमेरिकादेशान् समेत्य विभिन्नक्षेत्राणां विविधसहभागिभ्यः ऊर्जसं क्रीणाति।**

## विदेशमन्त्री - भूटाननरेशः

विदेशमन्त्री डॉ. एस्. जयशङ्करः ह्यः थिम्फूनगरे भूटान-नरेशेन जिग्मे-खेसर-नाम्ग्येल-वाङ्गचुक् इत्यनेन सह मेलनं कृतवान्। सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे डॉ. जयशङ्करः उक्तवान् यत् भारत-भूटानयोः मध्ये विद्यमानां विशिष्टां मैत्रीम् इतोऽपि सुदृढीकर्तुं भूटाननरेशद्वारा प्रदत्तमार्गदर्शनं महत्त्वपूर्णम् अस्ति।

## ऋतुविभागः

भारतर्तुविज्ञान-विभागेन अद्य बिहार-राजस्थान-केरल-माहे-ओडिशा-उपहिमालयीय-पश्चिमबङ्गाल-सिक्किमेषु च प्रबलवृष्टेः पूर्वानुमानं कृतम् अस्ति। ऋतुविभागेन अद्य उत्तराखण्ड-आन्ध्रप्रदेश-छत्तीसगढ-गुजरात-मध्यप्रदेश-कोङ्कण-गोवा-कर्नाटक-लक्षद्वीपेषु च विद्युत्पातेन प्रबलवातैश्च सह गर्जनवृष्टेः सम्भावना पूर्वानुमानिता अस्ति।

आगामिषु द्विदिवसेषु तमिलनाडु-पुडुचेरी-कराईकल-केरल-माहे-पूर्वोत्तरभारतस्य केषुचित् भागेषु तथा अण्डमान-निकोबारद्वीपसमूहेषु च प्रायः समानाः ऋतु-परिस्थितयः एव सम्भाव्यन्ते।

## क्रिकेट्

पुरुष-क्रिकेट्क्रीडायां, ह्यः रात्रौ नवदिल्ल्याम् आयोजिते तृतीये विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-द्वन्द्वे भारतेन अफगानिस्तानदलं सप्तविंशत्यधिकैक-शतधावनाङ्कैः पराजित्य त्रिस्पर्धात्मिका-शृङ्खलायां सर्वासु तिसृषु स्पर्धासु विजयः अधिगतः।